Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ नैमित्तिक

श्री शिवार्चन पद्धतिः

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २०२३९४
बुलन्दशहर (उ०प्र०)

प्रारम्भा

श्रीरङ्गनाथ प्रेस, वृन्दावन

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation, Delhi and eGangotri

शिवार्चन पश्चात्—भगवान् शंकर का दैनिक शृङ्गार चित्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वेदाचार्य रामजीलाल पालीवाल सांगवेद विद्यालय
पुस्तकालय
क्रम सं०
तिथि
४१, संगम विहार नजफगढ़, नई दिल्ली-४

वेदाचार्य रामजी लाल पालीवाल सांगवेद
विद्यालय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri

शिवार्चन पश्चात्—भगवान् शंकर का दैनिक शृङ्गार चित्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ नैमित्तिक

श्रीशिवार्चनपद्धतिः

संकलनकर्ता :

औदीच्यकुलभूषण वैदिक—

पं० मूलशंकर पं० काशीनाथ पं० रामशंकर शुक्लबन्धू

शाहजहाँपुर (उत्तर प्रदेश) निवासी

पं० प्रेम दत्त शास्त्री

जहांगीराबाद २०२३९४

बुलन्दशहर (उ०प्र०)

संशोधनकर्ता :

पं० हरिशरण वेदपाठी पं० शशिधर शर्मा

विष्णु नगर, नवलपरासी (नेपाल) निवासी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पाठकों से विनम्र प्रार्थना

(१) आवाहन एवं विसर्जन प्रतिष्ठित देवों का नित्य नहीं करना चाहिए।

(२) कृपया कोष्टक में दिये मन्त्र पार्थिवेश्वर पूजन में ही उच्चारण करें।

(३) श्रीशिवार्चन पूजन में मन्त्रोच्चारण के पश्चात् शृङ्गार के समय 'ॐ नमः शिवाय' महामन्त्र का उच्चारण कर समय का सदुपयोग शोभा पूर्ण होगा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आचमन मन्त्र

ॐ केशवाय नमः ॐ नारायणाय नमः ॐ माधवाय नमः ॐ हृषीकेशाय नमः
ॐ शिवाय नमः

पवित्रकरण मन्त्र

ॐ अपवित्रः पवित्रो वा, सर्वावस्थां गतोऽपि वा।
यः स्मरेत्पुण्डरीकाक्षं, स बाह्याभ्यन्तरः शुचिः ॥

आसन पवित्रकरण मन्त्र

ॐ पृथ्वी त्वया धृता लोका, देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि, पवित्रं कुरुचासनम् ॥

पं० श्री [illegible]
जहांगीराबाद २०२३४४
बुलन्दशहर (उ०प्र०)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथः स्वस्तिवाचनम्

हरि÷ॐ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिन÷पूषाव्विश्ववेदाः ॥ स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो वृहस्पतिर्द्दधातु ॥ १ ॥

ॐ पय÷पृथिव्व्याम्पयऽओषधीषु पयो दिव्व्यन्तरिक्षे पयोधाः ॥ पयस्वतीःप्रदिश÷सन्तु मह्यम् ॥ २ ॥

ॐ व्विष्णोरराटमसि व्विष्णोःश्नप्त्रेस्थोव्विष्णोः स्यूरसि व्विष्णोर्द्ध्रुवोसि ॥ व्वैष्णवमसि व्विष्णवेत्त्वा ॥ ३ ॥

ॐ अग्निर्द्देवता व्वातो देवता सूर्य्यो देवता चन्द्रमा देवता व्वसवो देवता रुद्रा देवता दित्या देवता मरुतो देवता विश्वे देवादेवता वृहस्पतिर्द्देवतेन्द्रोदेवता व्वरुणो देवता ॥ ४ ॥

ॐ द्यौः शान्तिरन्तरिक्ष ँ शान्ति÷पृथिवी शान्तिरापः शान्तिरोषधयः शान्ति÷ व्वनस्पतयः शान्तिर्व्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्व ँ शान्तिःशान्तिरेव शान्तिस्सामा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शान्तिरेधि ।। ५ ।।

ॐ शान्तिः शान्तिः शान्ति ॐ सर्वारिष्टशान्तिर्भवतु ।

पश्चात् बाएँ हाथ में अक्षत लेकर दाहिने हाथ से दिग्बन्धन निम्नलिखित मन्त्र से करे—

ॐ अपसर्पन्तु ये भूताः ये भूताः भूमिसंस्थिताः ।
ये भूताः विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया ।।१।।
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् ।
सर्वेषामविरोधेन शिवपूजां समारभेत् । २।

निम्नलिखित मन्त्रों से देवताओं का स्मरण करें—

ॐ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः ।।१।।
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि ।।२।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ।। ३ ।।
शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।। ४ ।।
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ।
सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ।। ५ ।।
वक्रतुण्ड महाकाय कोटिसूर्य्यसमप्रभ ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ।। ६ ।।
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तुते ।। ७ ।।
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ।। ८ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदित्याः वसवो रुद्राः विश्वेदेवा मरुद्गणाः ।
लोकपालाः प्रयच्छन्तु मङ्गलानि शुभं दिशः ॥ ९ ॥
मङ्गलं भगवान् विष्णुर्मङ्गलं गरुडध्वजः ।
मङ्गलं पुण्डरीकाक्षः मङ्गलायतनो हरिः ॥१०॥
तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि।११।
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवानीतिर्मतिर्मम॥१२॥
सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः ।
देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः ॥१३॥

ॐ श्रीमन्मगहाणाधिपतये नमः। श्रीलक्ष्मीनारायणाभ्यां नमः। उमामहेश्वराभ्यां नमः। शची-पुरन्दराभ्यां नमः। मातृपितृ चरणकमलेभ्यो नमः। इष्टदेवताभ्यो नमः। कुलदेवताभ्यो नमः॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्रामदेवताभ्यो नमः। स्थानदेवताभ्यो नमः। वास्तुदेवताभ्यो नमः। सर्वेभ्यो देवेभ्यो नमः। सर्वेभ्यो ब्राह्मणेभ्यो नमः।

ॐ विश्वेशं माधवं ढुण्ढि दण्डपाणिं च भैरवम् ।
वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम् ॥१४॥

कलश प्रार्थना

ॐ कलशस्य मुखे विष्णुःकण्ठे रुद्रः समाश्रितः ।
मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥१॥
कुक्षौ तु सागरास्सर्वे सप्तद्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽह्यथर्वणः ॥२॥
अर्जुनी गोमती चैव चन्द्रभागा सरस्वती ।
कावेरी कृष्णवेणा च यमुना च महानदी ॥३॥
तत्वायामिति शुनःशेप ऋषिः वरुणो देवता वरुणावाहने विनियोगः ॥४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ तत्त्वा यामि ब्रह्मणा व्वंदमा नस्तदाशास्तेयजमानो हविर्भिः। अहेडमानो व्वरुणेह बोध्युरुशर्ठ० समानऽआयुः प्रमोषीः ॥५॥

ॐ वं वरुणाय नमः। मंगलकलशाय नमः आवाहनमासनम्पाद्यं हस्तेऽर्घ्यं स्नानं गन्धं अक्षतं पुष्पं धूपं दीपं नैवेद्यं (फलं ताम्बूलं दक्षिणां नमस्कारञ्च कुर्यात्)।

जल गन्ध अक्षत पुष्प सुपारी दक्षिणा लेकर संकल्प करे।

ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य श्रीब्रह्मणो द्वितीयपरार्धे तत्रादौ श्रीश्वेतवाराहकल्पे सप्तमे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भारतवर्षे भरतखण्डे जम्बूद्वीपे आर्यावर्तान्तर्गत ब्रह्मावर्तैकदेशे विक्रमशके बौद्धावतारे देवब्रह्मणानां सन्निधौ अमुकनामसंवत्सरे अमुकायने अमुकऋतौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकराशिस्थितयोः चन्द्रसूर्ययोः अमुकराशिस्थते देवगुरौ शेषेषु ग्रहेषु यथास्थानस्थितेषु एवं ग्रहगुणविशेषेणविशिष्टायां एवं नक्षत्रग्रहयोगकरणमुहूर्तान्वितायाञ्च अमुकगोत्रोत्पन्नो मुकशर्माऽहं श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं (श्रीपार्थिवेश्वर) श्रीनर्व(र्म)देश्वर प्रसन्नतार्थं षोडशोपचारैः पूजनञ्च करिष्ये॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बाएँ हाथ में अक्षत लेकर दाहिने हाथ से गणेशादिक का आवाहन निम्न मन्त्रों से करे—

ॐ गजास्य गणनाथ त्वं सर्वविघ्नविनाशनं। लम्बोदर त्रिनेत्रश्च आगच्छ गजनायकः॥ गणानां त्वेति मन्त्रेण गणनाथं प्रपूजयेत्॥

हरि ÷ ॐ गणानान्त्वागणपतिꣳहवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधीनान्त्वा निधिपतिꣳहवामहे व्वसोमम। आहम जानिगर्ब्भधमात्त्वमजासि गर्ब्भधम्॥१॥

ॐ भूर्भुवः स्वः ऋद्धिबुद्धिसहिताय नमः गं गणपतये नमः (गणपतिमावाहयामि स्थापयामि)।

ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्।

इष्णन्निषाणा मुम्मऽइषाण सर्व्वलोकम्मऽइषाण॥२॥ गां गौर्य्यै नमः (गौरीमावाहयामि स्थापयामि)।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ वरुणस्योत्तम्भनमसि वरुणस्यस्कम्भसर्ज्जनीस्थोवरुणस्यऽऋतसदन्यसि-वरुणस्यऽऋतसदनमसि वरुणस्यऽऋत सदनमासीद ॥३। वं वरुणाय नमः (वरुणं-मावाहयामि स्थापयामि)।

ॐ नमः शम्भवायच मयो भवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥४। श्रीसाम्बसदाशिवाय नमः [शिवंमावाहयामि स्थापयामि]

पार्थिव पूजन हेतु प्राण प्रतिष्ठा मन्त्रः

(ॐ तदस्तु मित्रावरुणातदग्ने शंजोरसगश्य मिदमस्तुशस्तम् असि महीगांध-मुद्प्रतिष्ठां नमोतिदेवे वृहते साधनाय ॥ ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्यज्ञ-मिमन्तनोत्त्वरिष्टयज्ञꣳसमिमन्दधातु ॥ विश्वेदेवास इह मादयान्तामोऽम्प्रतिष्ठ ॥१॥ एष वै प्रतिष्ठा नाम यज्ञो यत्रैतेन यज्ञन सर्वमेव प्रतिष्ठितम्भवतु ॥२॥

अस्य श्रीप्राणप्रतिष्ठा मन्त्रस्यब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामानि छन्दांसि क्रियामयवपुःप्राणाख्या देवता आं बीजं ह्रीं शक्तिः क्रौं कीलकं देवप्राणप्रतिष्ठापने विनियोगः।

जहांगीराबाद २ २ ६४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब्रह्मविष्णुरुद्र ऋषिभ्यो नमः शिरसि। ऋग्यजुःसामच्छन्दोभ्यो नमो मुखे। प्राणाख्यदेवतायै नमः हृदि। आं बीजाय नमः गुह्ये। ह्रीं शक्तये नमः पादयोः। क्रौं कीलकाय नमः सर्वांगे।

ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोहं ॐ तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि तन्नोदन्तिः प्रचोदयात्। ॐ वक्रतुण्डाय नमः सशक्तिगणपतेः जीव इह स्थितः। ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोहं तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि तन्नो दन्तिः प्रचोदयात् ॐ सशक्तिवक्रतुण्डाय नमः गणपतेः सर्वेन्द्रियाणि इह स्थितानि। ॐ आं ह्रीं क्रौं यं रं लं वं श ष सं हं सः सोहं ॐ तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि तन्नो दन्तिः प्रचोदयात् ॐ सशक्ति वक्रतुण्डाय नमः गणपतेः ॐ वाङ्मनस्त्वक् चक्षुःश्रोत्रघ्राणजिह्वापाणिपादपायूपस्थानि प्राणाः इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा॥

ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः तत्पुरुषाय विद्महेमहादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात् ॐ साम्बशिवाय नमः शिवस्य जीव इह स्थितः॥ ॐ आं ह्रीं क्रौं यं र लं वं शं ष सं हं सः सोहं तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात् ॐ साम्बशिवाय नमः शिवस्य सर्वेन्द्रियाणि इह स्थितानि॥ ॐ आं ह्रीं क्रौं यं रं लं वं शं षं स हं सः सोहं तत्पुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात् ॐ साम्बशिवाय नमः शिवस्य ॐ वाङ्मनस्त्वक्चक्षुः श्रोत्रघ्राणजिह्वापाणिपादपायूपस्थानि प्राणाः इहागत्य सुखं अचिरं तिष्ठन्तु स्वाहा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आवाहन मन्त्रः

ॐ आ वो देवासऽईमहे व्वामम्प्रयत्यध्वरे । आवो देवा सऽआशिषोयज्ञियासोह-वामहे ।।१।। आवाहितो भव सुप्रतिष्ठितो भव) इति पार्थिव पुजनम्

ध्यान मन्त्रः

ॐ उद्यदिनेश्वररुचिं निजहस्त पद्मैः, पाशांकुशाभयवरान् दधतं गजास्यम् ।
रक्ताम्बरं सकलविघ्नहरं गणेशं, ध्यायेत् प्रसन्नमखिलाभरणाभिरामम् ।।१।।

सम्पूजकानां परिपालकानां, जितेन्द्रियाणाञ्च कृपोदराणाम् ।
देशे सुराष्ट्रे सुकुलेति राज्ञां, करोतु शान्ति भगवान् गणेशः ।।२।।

शिवतनयवरिष्ठं सर्वकल्याणमूर्त्तिं, परशुकमलहस्तं शोभितं मोदकेन ।
अरुणकुसुममालं व्यालयज्ञोपवीतं, मम हृदयनिवासं श्रीगणेशं नमामि ।।३।।

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नम् ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानम्
विश्वाद्यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रम् ॥१॥

चैतन्यं सुमनं मनं मन मनं मानं मनं मानसम् ।
माया धाव धवं धवं धव धवं धावं धवं माधवम् ॥
श्वासा सार सरं सरं सर सरं सारं सरं वासरम् ।
वैकुण्ठाधि भवं भवं भव भवं भावं भवं शाम्भवम् ॥२॥

वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणम् ।
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम् ॥
वन्दे सूर्य्यशशाङ्क वह्निनयनं वन्दे मुकुन्दप्रियम् ।
वन्दे भक्तजनाश्रयञ्च वरदं वन्दे शिवं शङ्करम् ॥३॥

मृत्युञ्जय महादेव त्राहि मां शरणागतम् ।
जन्ममृत्युजरारोगैः पीडितं कर्मबन्धनैः ॥४॥

CC-0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुष्पासन मन्त्रः

ॐ यातेरुद्रशिवा तनूरघोरापापकाशिनी ।
तया नन्तन्न्वा शंतमया गिरिशन्ताभिचाकशीहि ।।१।।

पाद्यमन्त्रः

ॐ यामिषुङ्गिरिशन्तहस्ते विभर्ष्यस्तवे ।
शिवाङ्गिरित्रतांकुरुमाहिर्ठ० सीः पुरुषंञ्जगत् ।।१।।

अर्घ्यमन्त्रः

ॐ शिवेनव्वचसात्त्वा गिरिशाच्छाव्वदामसि ।
यथानः सर्व्वमिज्जगदयक्ष्मर्ठ० सुमनाऽअसत् ।।१।।

आचमन मन्त्रः

ॐ अद्धचवो च दधिवक्ता प्रथमो दैव्यो भिषक् ।
अहींश्च सर्व्वाञ्जम्भयन्त्सर्व्वाश्चयातु धान्न्योधराचीः परा सुव ।।१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जलस्नानमन्त्रः

ॐ असौयस्ताम्रोऽअरुणऽउतबभ्रुः सुमङ्गल÷। येचैनꣳ० रुद्राऽअभितो दिक्षु श्रिताः सहस्रशोवैषाᳬहेडऽईमहे ॥१॥

पयःस्नानमन्त्रः

ॐ पय÷पृथिव्याम्पयऽओषधीषु पयो दिव्यन्तरिक्षेपयोधाः ॥ पयस्वतीःप्रदिश÷ सन्तु मह्यम् ॥१॥

पुनःजलस्नानमन्त्रः

ॐ व्वरुणस्योत्तम्भनमसि व्वरुणस्य स्कम्भसर्ज्जनीस्थो व्वरुणस्यऽऋतसदन्यसि व्वरुणस्यऽऋत सदनमसि व्वरुणस्यऽऋत सदनमासीद ॥१॥

दधिस्नानमन्त्रः

ॐ दधिक्राव्णोऽअकारिषञ्जिष्णो रश्वस्यव्वाजिन÷॥ सुरभिनो मुखाकरत्प्रणऽआयूᳬषितारिषत् ॥

दधि स्नान के पश्चात् पुनः वरुणस्योतम्भेति मन्त्र से जल स्नान ।

CC0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation, Delhi and eGangotri.

घृतस्नानमन्त्रः

ॐ घृतङ्घृत पावानःपिबतव्वसाँव्वसा पावानः पिबतान्तरिक्षस्य हविरसि स्वाहा । दिश÷प्रदिशऽआदिशोव्विदिशऽउद्दिशो दिग्भ्यः स्वाहा ।।१।।

घृत स्नान के पश्चात् फिर व्वरुणस्योत्तम्भेति मन्त्र से जल स्नान ।

मधुस्नानमन्त्रः

ॐ मधुव्वाताऋतायते मधुक्षरन्ति सिन्धवः ।। माध्वीर्न्नःसन्त्वोषधीः ।। मधुनक्त मुतोषसोमधुमत्पार्थिवꣳ रज÷।। मधुद्यौरस्तुन÷पिता ।। मधुमान्नोव्वनस्पति-र्म्मधु माँऽअस्तु सूर्य्य÷।। माध्वीर्गावो भवन्तुनः ।।१।।

मधुस्नान के पश्चात् फिर व्वरुणस्योत्तम्भेति मन्त्र से जल स्नान ।

शर्करास्नानमन्त्रः

ॐ अपाꣳरसमुद्वय सꣳ० सूर्य्ये सन्तꣳ० समाहितम् ।। अपाꣳरसस्य यो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रसस्तंव्वो गृह्णाम्युत्तममुपयाम गृहीतोसीन्द्रायत्त्वा जुष्टङ् गृह्णाम्येषते योनिरिन्द्राय त्वा जुष्टतमम् ॥१॥

शर्करास्नान के पश्चात् फिर वरुणस्योत्तम्भेति मन्त्र से जल स्नान ।

पंचामृत स्नानमन्त्रः

ॐ पञ्च नद्यः÷सरस्वती मपियन्ति सस्रोतसः ।
सरस्वती तु पञ्चधा सो देशे भवत्सरित् ॥१॥
पंचामृतं मयानीतं पयोदधि घृतं मधु ।
शर्करा च समायुक्तं स्नानार्थं प्रतिगृह्यताम् ॥२॥

पंचामृत स्नान के पश्चात् फिर व्वरुणस्योत्तम्भेति मन्त्र से जल स्नान् ।

सुगन्धित तैल स्नान मन्त्रः

ॐ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टि वर्द्धनम् ।
उर्व्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् ॥१॥

CC0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ त्र्यबकं यजामहे सुगन्धिंपति वेदनम् ।
उर्व्वारुकमिव बन्धनादितोमुक्षीय मा मुत÷॥२॥

अथाभिषेकमन्त्राः

ॐ नमस्ते रुद्द्रमन्न्यवऽउतोतऽइषवे नम÷॥ बाहुब्भ्या मुतते नम÷॥१॥

याते रुद्द्रशिवातनूरघोरापाप काशिनी । तयानस्तन्न्वा शन्न्तमयागिरिशन्न्ता-भिचाकशीहि ॥२॥

यामिषुङ्गिरिशन्न्तहस्तेब्विभर्ष्यस्तवे ॥ शिवाङ्गिरित्र तां कु रुमाहि᳡सीःपुरुष-ञ्जगत् ॥३॥

शिवेनव्वचसात्त्वागिरिशाच्छाव्वदा मसि ॥ यथानःसर्व्वमिज्जगदयक्ष्म᳡-सुमनाऽअसत् ॥४॥

अद्धचवोचदधिवक्ताप्प्रथमोदैव्व्योभिषक् ॥ अहींश्चसर्व्वाञ्जिम्भयन्त्सर्व्वाश्च-यातुधान्योधराचीःपरासुव ॥५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

असौयस्ताम्म्रोऽअरुणऽउतबब्भ्रुःसुमङ्गल÷।। यश्चैनꣳरुद्द्राऽअभितोदिक्षुश्रिताः सहस्रशो वैषाꣳहेडऽईमहे ।।६।।

असौयोवसर्प्पतिनीलग्ग्रीवो व्विलोहितः ।। उतैनङ्गोपाअदृश्श्रन्नदृश्श्रन्नुदहार्य्यः सदृष्ट्टोमृडयातिनः ।।७।।

नमोस्तु नीलग्ग्रीवाय सहस्राक्षायमीढुषे ।। अथोयेऽअस्य सत्वानोहन्तेब्भ्यो करन्नम÷।।८।।

प्रमुञ्च धन्वनस्त्वमुभयो रात्कर्न्योर्ज्ज्याम् ।। याश्चतेहस्तऽइषवः पराता-भगवोव्वप ।।९।।

व्विज्ज्यन्धनु÷कर्पर्द्दिनोव्विशल्ल्यो बाणवाँ २ ।। उत ।। अनेशन्नस्ययाऽइषवऽ-आभुरस्य निषङ्गधिः ।।१०।।

यातेहेतिर्म्मीढुष्ट्टमहस्तेबभूवते धनु÷।। तयास्म्मान्व्विश्श्वतस्त्वमयक्ष्म्मया-परिभुज ।।११।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri

परितेधन्न्वनोहेतिररस्म्मान्न्वृणक्त्वतुव्विश्वत÷॥ अथोयऽइषुधिस्तवारेऽअस्म्मन्निधेहितम् ॥१२॥

अवतत्यधनुष्ट्वꣳ सहस्राक्षशतेषुधे ॥ निशीर्य्यशल्यानाम्मुखाशिवोन÷सुमनाभव ॥१३॥

नमस्तऽआयुधायाना ततायधृष्णवे ॥ उभाब्भ्यामुतते नमो बाहुब्भ्यान्तवधन्न्वने ॥१४॥

मानोमहान्न्त मुतमानोऽअर्ब्भकम्मानऽउक्षन्न्तमुतमानऽउक्षितम् ॥ मानोव्वधीः पितरम्मो तमातरम्मान÷प्रियास्तन्न्वो रुद्ररीरिषः ॥१५॥

मानस्तोके तनये मानऽआयुषि मानोगोषुमानोऽअश्वेषुरीरिषः ॥ मानोव्वीरान्न्रुद्रभामिनोव्वधीर्हविष्म्मन्न्तः सदमित्त्वा हवामहे ॥१६॥

इति अमृताभिषेकोऽस्तु ॐ शान्तिः शान्तिः शान्तिः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शुद्धोदकस्नानमन्त्रः

ॐ शुद्धवालःसर्व्वशुद्ध वालो मणि वालस्तऽआश्विनाः श्येत÷श्येताक्षोऽरुणस्ते रुद्राय पशुपतये कर्णायामाऽअवलिप्तारौद्रानभोरूपाःपार्ज्जन्याः ॥१॥

गङ्गोदकस्नानमन्त्रः

ॐ इमम्मे वरुणश्रुधी हवमद्या च मृडय । त्वामवस्युराचके ॥१॥



श्रीभगवन्नाम सम्बन्धी माहात्म्य

श्रीतुलसीकृत रामायण द्वारा

सो०—जो सुमिरत सिधि होई गन नायक करिवर बदन ।
करहु अनुग्रह सोइ बुद्धि रासि सुभ गुन सदन ॥ १ ॥
मूक होइ बाचाल पंगु चढ़इ गिरिवर गहन ।
जासु कृपा सो दयाल द्रवउ सकल कलिमल दहन ॥ २ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri

नील सरोरुह स्याम तरुन अरुन बारिज नयन ।
करउ सो मम उर धाम सदा छीरसागर सयन ।। ३ ।।

कुन्द इन्दु सम देह उमा रमन करुना अयन ।
जाहि दीन पर नेह करउ कृपा मर्दन मयन ।। ४ ।।

बन्दउँ गुरु पद कंज कृपा सिन्धु नर रूप हरि ।
महामोह तम पुञ्ज जासु वचन रवि कर निकर ।। ५ ।।

दोहा—गिरा अरथ जल बीचि सम कहियत भिन्न न भिन्न ।
बंदउँ सीता राम पद जिन्हहि परम प्रिय खिन्न ।।

बंदउँ नाम राम रघुबर को । हेतु कृसानु भानु हिमकर को ।।
बिधि हरिहरमय बेद प्रान सो । अगुन अनूपम गुन निधान सो ।।
महामन्त्र जोइ जपत महेसू । कासी मुकुति हेतु उपदेसू ।।
महिमा जासु जान गनराऊ । प्रथम पूजिअत नाम प्रभाऊ ।।
जान आदि कबि नाम प्रतापू । भयउ सुद्ध करि उलटा जापू ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सहस नाम सम सुनि सिव बानी । जपि जेई पिय संग भवानी ।।
हरषे हेतु हेरि हर ही को । किय भूषन तिय भूषन ती को ।।
नाम प्रभाउ जान सिव नीको । कालकूट फलु दीन्ह अमी को ।।

दोहा—बरषा रितु रघुपति भगति तुलसी सालि सुदास ।
राम नाम बर बरन जुग सावन भादव मास ।।

आखर मधुर मनोहर दोऊ । बरन विलोचन जन जिय जोऊ ।।
सुमिरत सुलभ सुखद सब काहू । लोक लाहु परलोक निबाहू ।।

कहत सुनत सुमिरत सुठि नीके । राम लखन सम प्रिय तुलसी के ।।
बरनत बरन प्रीति बिलगाती । ब्रह्म जीव सम सहज सँघाती ।।

नर नारायन सरिस सुभ्राता । जग पालक बिसेषि जन त्राता ।।
भगति सुतिय कल करन विभूषन । जग हित हेतु बिमल बिधु पूषन ।।

स्वाद तोष सम सुगति सुधा के । कमठ सेष सम धर बसुधा के ।।
जन मन मंजु कंज मधुकर से । जीह जसोमति हरि हलधर से ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दोहा—एकु छत्रु एकु मुकुटमनि सब बरननि पर जोउ ।
तुलसी रघुबर नाम के बरन बिराजत दोउ ।।

समुझत सरिस नाम अरु नामी । प्रीति परस्पर प्रभु अनुगामी ।।
नाम रूप दुइ ईस उपाधी । अकथ अनादि सुसामुझि साधी ।।
को बड़ छोट कहत अपराधू । सुनि गुन भेदु समुझिहहिं साधू ।।
देखिअहिं रूप नाम आधीना । रूप ग्यान नहिं नाम बिहीना ।।
रूप बिसेष नाम बिनु जानें । करतल गत न परहिं पहिचानें ।।
सुमिरिअ नाम रूप बिनु देखें । आवत हृदयँ सनेह बिसेषें ।।
नाम रूप गति अकथ कहानी । समुझत सुखद न परति बखानी ।।
अगुन सगुन बिच नाम सुसाखी । उभय प्रबोधक चतुर दुभाषी ।।

दोहा—राम नाम मनिदीप धरु जीह देहरीं द्वार ।
तुलसी भीतर बाहेरहुँ जौं चाहसि उजिआर ।।
हिय निर्गुन नैननि सगुण रसना नाम सुनाम ।
मानहुँ पुर लम्पट लसत तुलसी ललित ललाम ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नाम जीहँ जपि जागहिं जोगी । बिरति बिरचि प्रपंच बियोगी ॥
ब्रह्म सुखहिं अनुभवहिं अनूपा । अकथ अनामय नाम न रूपा ॥
जाना चहहिं गूढ़ गति जेऊ । नाम जीहँ जपि जानहिं तेऊ ॥
साधक नाम जपहिं लय लाएँ । होहिं सिद्ध अनिमादिक पाएँ ॥
जपहिं नामु जन आरत भारी । मिटहिं कुसङ्कट होहिं सुखारी ॥
राम भगत जग चारि प्रकारा । सुकृती चारिउ अनघ उदारा ॥
चहू चतुर कहुँ नाम अधारा । ग्यानी प्रभुहि बिसेषि पिआरा ॥
चहुँ जुग चहुँ श्रुति नाम प्रभाऊ । कलि बिसेषि नहिं आन उपाऊ ॥

दोहा—सकल कामना हीन जे राम भगति रस लीन ।
नाम सुप्रेम पियूष ह्रद तिन्हहुँ किए मन मीन ॥

अगुन सगुन दुइ ब्रह्म सरूपा । अकथ अगाध अनादि अनूपा ॥
मोरें मत बड़ नामु दुहू तें । किए जेहिं जुग निज बस निज बूतें ॥
प्रौढ़ि सुजन जनि जानहिं जन की । कहउँ प्रतीति प्रीति रुचि मन की ॥
एकु दारुगत देखिअ एकू । पावक सम जुग ब्रह्म बिबेकू ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उभय अगम जुग सुमन नाम तें । कहेउँ नामु बड़ ब्रह्म राम तें ।।
व्यापकु एकु ब्रह्म अविनासी । सत चेतन घन आनन्द रासी ।।
अस प्रभु हृदयँ अछत अविकारी । सकल जीव जग दीन दुखारी ।।
नाम निरूपन नाम जतन तें । सोउ प्रगटत जिमि मोल रतन तें ।।

दोहा—निरगुन तें एहि भाँति बड़ नाम प्रभाउ अपार ।
कहउँ नामु बड़ राम तें निज बिचार अनुसार ।।

राम भगत हित नर तनु धारी । सहि सङ्कट किए साधु सुखारी ।।
नामु सप्रेम जपत अनयासा । भगत होहिं मुद मङ्गल बासा ।।
राम एक तापस तिय तारी । नाम कोटि खल कुमति सुधारी ।।
रिषि हित रामसु केतुसुता की । सहित सेन सुत कीन्हि बिबाकी ।।
सहित दोष दुख दास दुरासा । दलइ नामु जिमि रवि निसि नासा ।।
भंजेउ राम आपु भव चापू । भव भय भंजन नाम प्रतापू ।।
दण्डक बनु प्रभु कीन्ह सुहावन । जन मन अमित नाम किए पावन ।।
निसि चर निकर दले रघुनन्दन । नामु सकल कलि कलुष निकन्दन ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दोहा—सबरी गीध सुसेवकनि सुगति दीन्हि रघुनाथ ।
नाम उधारे अमित खल बेद बिदित गुन गाथ ।।

राम सुकण्ठ विभीषन दोऊ । राखे सरन जान सबु कोऊ ।।
नाम गरीव अनेक नेवाजे । लोक वेद वर विरिद विराजे ।।
राम भालु कपि कटकु बटोरा । सेतु हेतु श्रमु कीन्ह न थोरा ।।
नामु लेत भवसिन्धु सुखाहीं । करहु बिचारु सुजन मन माहीं ।।
राम सकुल रन रावनु मारा । सीय समेत निज पुर पगु धारा ।।
राजा रामु अवध रजधानी । गावत गुन सुर मुनि वर बानी ।।
सेवक सुमिरत नामु सप्रीती । बिनु श्रम प्रबल मोह दलु जीती ।।
फिरत सनेह मगन सुख अपनें । नाम प्रसाद सोच नहिं सपनें ।।

दोहा—ब्रह्म राम तें नामु बड़ बर दायक बर दानि ।
रामचरित सत कोटि महँ लिय महेस जियँ जानि ।।

नाम प्रसाद सम्भु अविनासी । साजु सुमङ्गल मङ्गल रासी ।।
सुक सनकादिक सिद्ध मुनि जोगी । नाम प्रसाद ब्रह्म सुख भोगी ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नारद जानेउ नाम प्रतापू । जग प्रिय हरि हरि हर प्रिय आपू ॥
नामु जपत प्रभु कीन्ह प्रसादू । भगत सिरोमनि भे प्रहलादू ॥
ध्रुवँ सगलानि जपेउ हरि नाऊँ । पायउ अचल अनूपम ठाऊँ ॥
सुमिरि पवनसुत पावन नामू । अपने बस करि राखे रामू ॥
अपतु अजामिलु गजु गनिकाऊ । भए मुकुत हरि नाम प्रभाऊ ॥
कहौं कहाँ लगि नाम बड़ाई । रामु न सकहिं नाम गुन गाई ॥

दोहा—नामु राम को कलपतरु कलि कल्यान निवासु ।
जो सुमिरत भयो भाँग तें तुलसी तुलसीदासु ॥
तुलसी जंगम तरु लसे आनन कानन खेत ।
कविता जाकी मंजरी राम भ्रमर रस लेत ॥

चहुँ जुग तीनि काल तिहुँ लोका । भए नाम जपि जीव बिसोका ॥
बेद पुरान सन्त मत एहू । सकल सुकृत फल राम सनेहू ॥
ध्यानु प्रथम जुग मख बिधि दूजें । द्वापर परितोषत प्रभु पूजें ॥
कलि केवल मल मूल मलीना । पाप पयोनिधि जन मन मीना ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नाम कामतरु काल कराला । सुमिरत समन सकल जग जाला ॥
राम नाम कलि अभिमत दाता । हित परलोक लोक पितु माता ॥
नहिं कलि करम न भगति विवेकू । राम नाम अवलम्बन एकू ॥
कालनेमि कलि कपट निधानू । नाम सुमति समरथ हनुमानू ॥

दोहा—राम नाम नरकेसरी कनककसिपु कलिकाल ।
जापक जन प्रहलाद जिमि पालिहि दलि सुरसाल ॥

भायँ कुभायँ अनख आलसहूँ । नाम जपत मङ्गल दिसि दसहूँ ॥
सुमिरि सो नाम राम गुन गाथा । करउँ नाइ रघुनाथहि माथा ॥
मोरि सुधारिहि सो सब भाँती । जासु कृपा नहिं कृपा अघाती ॥
राम सुस्वामि कुसेवकु मोसो । निज दिसि देखि दयानिधि पोसो ॥
लोकहुँ वेद सुसाहिब रीती । विनय सुनत पहिचानत प्रीती ॥
गनी गरीब ग्रामनर नागर । पण्डित मूढ़ मलीन उजागर ॥
सुकवि कुकवि निजमति अनुहारी । नृपहि सराहत सब नर नारी ॥
साधु सुजान सुसील नृपाला । ईश अंस भव परम कृपाला ॥

CC-0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri

सुनि सनमानहिं सबहि सुबानी । भनिति भगति नति गति पहिचानी ।।
यह प्राकृत महिपाल सुभाऊ । जान सिरोमनि कोसलराऊ ।।
रीझत राम सनेह निसोतें । को मति मन्द मलिनमति मोतें ।।

दोहा—सठ सेवक की प्रीति रुचि रखिहहिं राम कृपालु ।
उपल किए जल जान जेहि सचिव सुमति कपि भालु ।।
हौंहु कहावत सबु कहत राम सहत उपहास ।
साहिब सीतानाथ सो सेवक तुलसीदास ।।

अति बड़ि मोहि ढिठाई खोरी । सुनि अघ नरकहुं नाक सकोरी ।।
समुझि सहम मोहि अपडर अपनें । सो सुधि शम्भू कीन्हि नहिं सपनें ।।
सुनि अवलोक सुचित चख चाही । भगति मोर मति स्वामि सराही ।।
कहत नसाइ होइ हियं नीकी । रीझत राम जानि जन जी की ।।
रहति न प्रभु चित चूक किए की । करत सुरति सय बार हिए की ।।
जेहिं अघ बधेउ ब्याध जिमि बाली । फिरि सुकण्ठ सोइ कीन्हि कुचाली ।।
सोइ करतूति विभीषन केरी । सपनेहुँ सो न राम हियँ हेरी ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ते भरतहि भेंटत सनमाने । राजसभाँ रघुबीर बखानें ॥

दोहा—प्रभु तरु तर कपि डार पर ते किए आपु समान ।
तुलसी कहूँ न राम से साहिब सील निधान ॥
राम निकाईं रावरी हैं सबही को नीक ।
जौं यह साँची है सदा तौ नीको तुलसीक ॥
एहि बिधि निज गुन दोष कहि सबहि बहुरि सिरु नाइ ।
बन्दऊ रघुबर बिसद जसु सुनि कलि कलुस नसाइ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्री श्री आद्य शंकराचार्य जी द्वारा विरचित

शिव मानस पूजा स्तोत्रम्

रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं,
नानारत्नविभूषितं मृगमदा मोदाङ्कितं चन्दनम् ।
जातीचम्पकबिल्वपत्ररचितं पुष्पं च धूपं तथा,
दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ॥१॥

सौवर्णे मणिखण्डरत्नरचिते पात्रे घृतं पायसं,
भक्ष्यं पंचविधं पयोदधियुतं रंभाफलं फाणितम् ।
शाकानामयुतं जलं रुचिकरं कर्पूरखण्डोज्ज्वलं,
ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ॥२॥

छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं,
वीणाभेरिमृदङ्गका हलकला गीतं च नृत्यं तथा ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri

साष्टांग प्रणतिः स्तुतिर्बहुविधा ह्येतत्समस्तं मया,
सकल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ॥३॥
आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं,
पूजा ते विषयोपभोगरचना निद्रा समाधि स्थितिः ।
संचारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो,
यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥४॥
इत्येवं हरपूजने प्रतिदिनं यो वा त्रिसंध्यं पठे-
त्सेवाश्लोकतुष्टयं प्रतिदिनं पूजां हरेर्मानसी ।
सोऽयं सौख्यमवाप्नुयाद्द्युतिधरं साक्षाद्धरेर्दर्शनं,
व्यासस्तेन महावसानसमये कैलासलोकं गतः ॥५॥
करचरणकृतं वाक्कायजं कर्मजं वा, श्रवणनयनजं वा मानसं वाऽपराधम् ।
विहितमविहितं वा सर्वमेतत्क्षमस्व, जय जय करुणाब्धे श्रीमहादेव शंभो ॥६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri

द्वादश ज्योतिर्लिंगानि

सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम् ।
उज्जयिन्यां महाकालमोंकारममलेश्वरम् ॥ १ ॥
परल्यां वैजनाथं च डाकिन्यां भीमशङ्करम् ।
सेतुबन्धे तु नागेशं रामेशं दारुकावने ॥ २॥
वाराणस्यां तु विश्वेशं त्र्यम्बकं गौमतीतटे ।
हिमालये तु केदारं घुसृणेशं शिवालये ॥ ३ ॥
एतानि ज्योतिर्लिङ्गानि यः सायं प्रातः पठेन्नरः ।
सप्त जन्मकृतं पापं स्मरणेन विनश्यति ॥ ४ ॥

पं० प्रेम [illegible]
जहांगीराबाद २०२३९४
[illegible] (उ० प्र०)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri

माननीय यक्ष महोदय श्री पुष्पदन्त द्वारा विरचित

शिव महिम्न स्तोत्रम्

असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे, सुरतरुवरशाखा लेखनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालं, तदपि तव गुणानामीश पारं न यति ।।१।।
असुरसुरमुनोन्द्रैरर्चितस्येंदुमौलेर्ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य ।
सकलगुणवरिष्ठः पुष्पदन्ताभिधानो, रुचिरमघुवृत्तैः स्तोत्रमेतच्चकार ।। २ ।।
अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्पठति परम भक्त्या शुद्धचित्तः पुमान्यः ।
स भवति शिवलोके रुद्रतुल्यस्तथाऽत्र, प्रचुरतरधनायुः पुत्रवान् कीर्त्तिमांश्च ।। ३ ।
महेशान्नापरो देवो महिम्नो नापरास्तुतिः ।
अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः परम् । ४।।
दीक्षादानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः ।
महिम्नस्तव पाठस्य कलां नार्हन्ति षोडशीम् ।।५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri

कुसुमदशननामा सर्वगन्धर्वराजः शशिधरवरमौलेर्देवदेवस्य दासः ।
स गुरुनिजमहिम्नो भ्रष्ट एवास्य रोषात् स्तवनमिदमकार्षीद्दिव्यदिव्यंमहिम्नः ।। ६ ।।

सुरवर-मुनिपूज्यं स्वर्गमोक्षैकहेतुं पठति यदि मनुष्यः प्रांजलिर्नान्यचेताः ।
व्रजति शिवसमीपं किन्नरैः स्तूयमानः स्तवनमिदममोघं पुष्पदन्तप्रणीतम् ।। ७ ।।

श्रीपुष्पदन्तमुखपंकजनिर्गतेन स्तोत्रेण किल्विषहरेण हरप्रियेण ।
कण्ठस्थितेन पठितेन समाहितेन सुप्रीणितो भवति भूतपतिर्महेशः ।। ८ ।।

इत्येषा वाङ्मयी पूजा श्रीमच्छं करपादयोः ।
अर्पिता तेन देवेशः प्रीयतां मे सदाशिवः ।।९।।

श्रीतुलसीदास जी द्वारा रचित

भुजङ्गप्रयात, रुद्राष्टक स्तोत्रम्

ॐ नमामीशमीशाननिर्वाणरूपं, विभुं व्यापकं ब्रह्मवेद स्वरूपम् ।
अजं निर्गुणं निर्विकल्पं निरीहं, चिदाकाशमाकाशवासंभजेऽहम् ।।१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निराकारमोंकारमूलं तुरीयं; गिरा ज्ञान गोतीतमीशं गिरीशम् ।
करालं महाकालकालं कृपालं, गुणागार संसार पारं नतोऽहम् ।।२।।
तुषाराद्रि सङ्काशगौरं गभीरम्, मनोभूत कोटि प्रभा श्रीशरीरम् ।
स्फुरन्मौलि कल्लोलिनी चारु गङ्गा, लसद्भालबालेन्दु कण्ठे भुजंगा ।।३।।
चलत्कुण्डलं शुभ्रनेत्रं विशालं, प्रसन्नाननं नीलकण्ठं दयालुम् ।
मृगाधीश चर्माम्बरं मुण्डमालं, शिवं शङ्करं सर्वनाथं भजामि ।।४।।
प्रचण्डं प्रकृष्टं प्रगल्भं परेशं, अखण्डं अजं भानुकोटि प्रकाशम् ।
त्रिधाशूल निर्मूलनं शूलपाणिं, भजेऽहं भवानीपतिं भावगम्यम् ।।५।।
कलातीत कल्याण कल्पान्तकारी, सदा सज्जनानन्ददाता पुरारी ।
चिदानन्द सन्दोह मोहापहारी, प्रसीद प्रसीद प्रभो मन्मथारी ।।६।।
न यावत् उमानाथ पादारविन्दं, भजन्तीह लोके परे वा नराणाम् ।
न तावत् सुखं शान्तिसंतापनाशं, प्रसीद प्रभो सर्वभूताधिवासम् ।।७।।

CC-0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न जानामि योगं जपं नैव पूजां, नतोहं सदा सर्वदा शम्भु तुभ्यम् ।
जरा जन्मदुःखौघतातप्यमानं, प्रभो पाणि आपन्नमामीश शम्भो ।८॥

रुद्राष्टकमिदं प्रोक्तं विप्रेण हरतुष्टये ।
ये पठन्ति नरा भक्त्या तेषां शम्भुः प्रसीदति ॥९॥

दोहा—सुनि विनती सर्वज्ञ शिव, देखि विप्र अनुरागु ।
मन्दिर नभवाणी भई, हे द्विजवर वर माँगु ॥१॥
जो प्रसन्न प्रभु मोहिं पर, नाथ दीन पर नेहु ।
निज पद भक्ति देहु प्रभु, पुनि दूसर वर देहु ॥२॥
तव माया वश जीव जड़, सन्तत फिरहि भुलान ।
तिन्ह पर क्रोध न करिअ प्रभु, कृपासिन्धु भगवान् ॥३॥
शङ्कर दीन दयालु प्रभु, यहि पर होहु कृपाल ।
शाप अनुग्रह होइ जेहि, नाथ थोरिही काल ॥४॥

पं० पेमराज शर्मा
जहांगीराबाद २०२३४
पुस्तकालय (ग०प्र०)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वस्त्रार्पणम्

ॐ अ सौ योवसर्प्पति नीलग्रीवो ऽविलोहितः ।
उतैनङ्गोपाऽअदृश्रन्नदृश्र्श्रन्नुदहार्य्यः सदृष्टोमृडयातिन÷॥१॥

यज्ञोपवीत विनियोग

ॐ यज्ञोपवीतमिति मन्त्रस्य परमेष्ठी ऋषिस्त्रिष्टुप्छन्दो ।
लिङ्गोक्ता देवता यज्ञोपवीत परिधाने विनियोगः ॥१॥

यज्ञोपवीत मन्त्रः

ॐ यज्ञोपवीतं परमं पवित्रं प्रजापततेर्यत्सहजं पुरस्तात् ।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥२॥

ॐ नवभिस्तंतुभिर्युक्तं त्रिगुणं देवतामयम् ।
उपवीतं मया दत्तं गृहाण परमेश्वर ॥३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भस्म मन्त्रः

ॐ प्रशद्य भस्म्मना योनिमपश्चपृथिवीमग्ने ।
स७सृज्ज्यमातृभिष्ट्वज्ज्योतिष्म्मान्पुनरासदः ॥१॥

चन्दन (गन्ध) मन्त्राः

ॐ श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥१॥

ॐ प्रमुञ्च धन्वनस्त्वमुभयो राक्न्योर्ज्ज्याम् ।
याश्चते हस्तऽइषवः पराता भगवो त्वप ॥ २ ॥

ॐ त्वाङ्गन्धर्व्वाऽअखनं स्त्वामिन्द्रस्त्वाम्बृहस्पति÷।
त्वामोषधे सोमोराजाव्विद्वान्न्यक्ष्मादमुच्च्यत ॥ ३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तुलसीदल मन्त्र

ॐ तुलसीं हेमरूपां च, रत्नरूपाञ्चमञ्जरीम् ।
भव मोक्ष प्रदां तुभ्यमर्पयामि हरिप्रियाम् ।। १ ।।

ॐ शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः ।
माद्यावापृथिवी अभिशोचीर्मान्तरिक्षं माव्वनस्पतीन् ।।२।।

अक्षत मन्त्राः

ॐ अक्षताश्च सुरश्रेष्ठ कुंकुमाक्तास्सुशोभिताः ।
मया निवेदिता देव अक्षतान् प्रतिगृह्यताम् ।। १ ।।

ॐ अक्षन्नमी मदन्तह्यवप्रियाऽअधूषत ।
अस्तोषतस्स्वभानवो व्विप्प्रानविष्ठयामतीयोजान्विन्द्रतेहरी ।।२ ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri

पुष्प मन्त्राः

ॐ माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।
मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥ १ ॥

ॐ नमः पार्य्यायचावार्य्यायचनमः प्रतरणायचोत्तरणायच ।
नमस्तीर्थ्याय च कूल्यायच नमः शष्प्यायच फेन्यायच ॥ २ ॥

बिल्वपत्र मन्त्राः

ॐ त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रयायुधम् ।
त्रिजन्मपापसंहारं बिल्वपत्रं शिवार्पणम् ॥ १ ॥

त्रिशाखैर्बिल्वपत्रैश्च अच्छिद्रैः कोमलै शुभैः ।
शिवपूजां करिष्यामि बिल्वपत्रं शिवार्पणम् ॥ २ ॥

दर्शनं बिल्वपत्रस्य स्पर्शनं पापनाशनम् ।
अघोरपापसंहारं बिल्वपत्रं शिवार्पणम् ॥ ३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दन्तिकोटिसहस्राणि वाजपेयशतानि च ।
कोटिकन्यामहादानं बिल्वपत्रं शिवार्पणम् ॥ ४ ॥

लक्ष्म्याः स्तनाद् उत्पन्नं महादेवस्य च प्रियम् ।
बिल्वपत्रं प्रयच्छामि बिल्वपत्रं शिवार्पणम् ॥५॥

मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे ।
अग्रतः शिवरूपाय बिल्वपत्रं शिवार्पणम् ॥ ६ ॥

ॐ नमोबिल्मिने च कवचिने च नमो व्वर्मिणे च व्वरूथिनेचनमः÷
श्रुतायचश्रुतसेनाय च नमो दुन्दुभ्यायचाहनन्याय च ॥ ७ ॥
ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ॥ ८ ॥

दूर्वाङ्कुर मन्त्रः

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ।
एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥ १ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धूप मन्त्रः

ॐ वनस्पतिरसोद्भूतो गन्धाढ्यो देववल्लभः ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ १ ॥

ॐ धूरसिधूर्व्व धूर्व्वन्तन्धूर्व्वतं व्योस्मान्धूर्व्वतितन्धूर्व्व यंव्वयन्धूर्व्वामः ।
देवानामसिव्वह्नितमꣳ सस्नितमंप्रप्रितमञ्जुष्टतमन्देवहूतमम् ॥ २ ॥

दीपक मन्त्रः

ॐ आज्यं च वर्त्तिसंयुक्तं वह्निना योजितं मया ।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥१॥

ॐ नमऽआशवे चाजिरायच नमः शीघ्रायच शीभ्यायच ।
नमऽऊर्म्यायचाव[illegible]न्यायच नमो नादेयाय च द्वीप्यायच ॥२॥

पं० [illegible] जहांगीराबाद २०२१६४ बुलन्दशहर (उ०प्र०)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नैवेद्यमन्त्रः

ॐ शर्कराखण्डकादीनि दधिक्षीरघृतानि च ।
आहारं भक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यताम् । १ ॥

ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा । ॐ व्यानाय स्वाहा । ॐ उदानाय स्वाहा । ॐ समानाय स्वाहा ।

ॐ अम्बेऽअम्बिकेऽम्बालिके नमा नयति कश्चन ।
ससस्त्यश्वकः सुभद्रिकाँ २ काम्पीलवासिनीम् ॥ २ ॥

ऋतुफलमन्त्रः

ॐ याः फलिनी र्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः ।
बृहस्पति प्रसूतास्तानो मुञ्चन्त्व ठं० हसः ॥१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation, Delhi and eGangotri.

नैवेद्यध्यानम्

ॐ नाभ्याऽआसीदन्तरिक्षꣳ० शीर्ष्णो द्यौः समवर्त्तत ।
पद्भ्याम्भूमिर्द्दिशः श्रोत्रात्तथा लोकाँ २ ऽअकल्पयन् ।। १ ।।

नैवेद्यं निवेदयामि नैवेद्यान्ते शुद्धाचमनीयम् जलं समर्पयामि ।

ॐ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्द्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ।। २ ।।

ताम्बूल मंत्रः

नागवल्लीदलैर्युक्तं पूगीफलसमन्वितम् ।
कर्पूरेण समायुक्तं ताम्बूलं प्रतिगृह्यताम् ।। १ ।।

सुगन्धित द्रव्य मन्त्र

ॐ अहिरिवभोगैःपर्य्येतिबाहुँज्याया हेतिम्परिबाधमानः ।
हस्तघ्नो विश्वाव्वयुनानि विद्वान् पुमान्पुमाꣳ सम्परि पातु विश्वतः ।।१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दक्षिणा मन्त्रः

(ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत् ।
सदाधार पृथिवीं द्यामुते मां कस्मै देवाय हविषा व्विधेम ॥१॥)

आरती मन्त्रः

गन्धाक्षतैः आरतीं सम्पूज्य धेनुमुद्रां प्रदर्श्य च आरार्तिकं कुर्य्यात् ।

ॐ कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।
सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥ १ ॥

कर्पूरपात्रेण मनोहरेण सुवर्णपात्रेण करस्थितेन ।
सादित्यभाषां भव भावनाय आरार्त्तिकम्मेव समर्पयामि ॥ २ ॥

ॐ जय शिव ओंकारा हर शिव ओंकारा ।
ब्रह्माविष्णुसदाशिव अर्धाङ्गे गौरा ॥
ॐ हर हर हर महादेव ॥ १ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एकानन-चतुरानन-पंचानन राजै, शिव पंचानन-राजै ।
हंसासन गरुडासन, वृष वाहन छाजै ॥
ॐ हर हर हर महादेव ॥ २ ॥

दो भुज चारु चतुर्भुज दशभुजतें सोहे, शिवदश भुज तें सोहे ।
त्रिगुणा रूप निरखता २ शिव त्रिभुवनजन मोहे ॥
ॐ हर हर हर महादेव ॥ ३ ॥

अक्षमाला बनमाला मुण्डमाला धारी, शिव मुण्डमालाधारी ।
त्रिपुरारी मुरारी; कर कमलाधारी ॥
ॐ हर हर हर महादेव ॥ ४ ॥

करके मध्य कमण्डल चक्र त्रिशुल धरता, शिवचक्र त्रिशुल धरता ।
जगकर्त्ता जगहर्त्ता, जग पालन कर्त्ता ॥
ॐ हर हर हर महादेव ॥ ५ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्वेताम्बर पीताम्बर बाघम्बर अंगे, शिव बाघम्बर अंगे ।
सनकादिक भक्तादिक भूतादिक संगे ॥
ॐ हर हर हर महादेव ॥ ६ ॥

काशी में विश्वनाथ विराजत नन्दो ब्रह्मचारी, शिव नन्दो ब्रह्मचारी ।
नित उठ भोग लगावत, नित उठ दर्शन पावत, महिमा अतिभारी ॥
ॐ हर हर हर महादेव ॥ ७ ॥

आरती शान्त करने का मन्त्र

ॐ द्यौः शान्तिरन्तरिक्ष ँ० शान्ति ÷ पृथिवी शान्तिरापः शान्तिरोषधयः शान्ति ÷ ॥ व्वनस्पतयः शान्तिर्व्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्व्व ँ० शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥ १ ॥

पुष्पाञ्जलि मन्त्राः

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन् ।
तेहनाकं महिमान÷सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ १ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ राजाधिराजाय प्रसह्य साहिने, नमो वयं वैश्रवणाय कुर्महे ।
स मे कामान् काम कामाय मह्यम्, कामेश्वरो वैश्रवणो ददातु ।
कुबेराय वैश्रवणाय महाराजाय नमः ॥ २ ॥

ॐ स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं,
पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं ।
समन्तपर्यायी स्यात् सार्वभौमः सार्वायुष आन्तादा,
परार्धात्पृथिव्यै समुद्र पर्यंताया एकराडिति ॥
तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो, मरुतस्यावसन् गृहे,
आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासदइति ॥३॥

ॐ विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुतविश्वतस्पात् ।
सम्बाहुभ्यान्धमति सम्पतत्रैर्द्यावाभूमी जनयन्देवऽएक ÷ ॥४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ सद्योजातम्प्रपद्यामि सद्योजातायवै नमो नमः ।
भवेभवे नाति भवेभवस्वमां भवोद्भवाय नमः ।। ५ ।।
वामदेवायनमो ज्येष्ठाय नमः श्रेष्ठाय नमः रुद्राय नमः ।
कालाय नमः कलविकरणाय नमो बल विकरणाय नमः ।।६।।
बलाय नमो बल प्रमथनाय नमः ।
सर्वभूत दमनाय नमो मनोन्मनाय नमः ।।७।।
अघोरेभ्योथघोरेभ्यो घोरघोरतरेभ्यः ।
सर्व्वेभ्यः सर्व्वशर्वेभ्यो नमस्तेऽअस्तु रुद्ररूपेभ्यः ।।८।।
ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात् ।।९।।
ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणो ।
धिपतिर्ब्रह्माशिवो मेऽअस्तु सदा शिवोम् । हर हर ।। १० ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri

प्रदक्षिणा मन्त्रः

ॐ यानि कानिच पापानि, जन्मान्तरकृतानि च ।
तानि सर्वाणि नश्यन्तु, प्रदक्षिणपदे पदे ॥ १ ॥

ॐ ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः ।
तेषाᳬसहस्रयो-जनेवधन्वानितन्मसि ॥ २ ॥

क्षमा प्रार्थना

ॐ विघ्नेश्वराय वरदाय सुरप्रियाय, लम्बोदराय सकलाय जगद्धिताय ।
नागाननाय श्रुतियज्ञविभूषिताय, गौरीसुताय गणनाथ नमो नमस्ते ॥१॥

ॐ या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः, पापात्मनां कृतधियां हृदयेषु बुद्धिः ।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा, तां त्वां नताःस्म परिपालय देवि विश्वम् ॥२॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः, स्वस्थैः स्मृतामतिमतीव शुभां ददासि ।
दारिद्र्यदुःखभयहारिणि का त्वदन्या, सर्वोपकारकरणाय सदार्द्रचित्ता ॥३॥

रोगानशेषानपहंसि तुष्टा, रुष्टा तु कामान्सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां,त्वामाश्रिता ह्या श्रयतां प्रयान्ति ॥४॥
देवी प्रपन्नार्ति हरे प्रसीद, प्रसीद मातर्जगतोखिलस्य ।
प्रसीद विश्वेश्वरि पाहि विश्वं, त्वमीश्वरी देवि चराचरस्य ॥५॥

विश्वेश्वरि त्वं परिपासि विश्वं, विश्वात्मिका धारयसीति विश्वम् ।
विश्वेशवन्द्या भवती भवन्ति, विश्वाश्रया ये त्वयि भक्तिनम्राः ॥६॥
शरणागतदीनार्त्त, परित्राणपरायणे ।
सर्वस्यार्त्तिहरे देवि, नारायणि नमोऽस्तुते ॥७॥
सर्वमंगलमांगल्ये, शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि, नारायणि नमोऽस्तुते ॥८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri

ॐ आवाहनं न जानामि, न जानामि विसर्ज्जनम् ।
पूजां चैव न जानामि, क्षमस्व परमेश्वर ॥ १ ॥
मन्त्रहीनं क्रियाहीनं, भक्तिहीनं सदाशिव ।
यत्पूजितं मया देव, परिपूर्णंतदस्तु मे ॥ २ ॥
अन्यथा शरणं नास्ति, त्वमेव शरणं मम ।
तस्मात्कारुण्यभावेन, रक्ष मां परमेश्वर ॥ ३ ॥

ॐ अङ्गहीनं क्रियाहीनं, विधिहीनं महेश्वर ।
पूजितोऽसि मया देव, तत्क्षमस्व भ्रमात्कृतम् ॥ १ ॥
यद्यद्युपहृतैः पुष्पैः, रपास्तै र्भावदूषितै ।
केशकीटापविद्धैश्च, पूजितोसि मया प्रभो ॥ २ ॥
अन्यत्रासक्तचित्तेन, क्रियाहीनेन वा प्रभो ।
मनोवाक्कायदुष्टेन, पूजितोसि त्रिलोचन ॥ ३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यच्चोपहतपात्रेण, कृतंमर्घ्यादिकं मया ।
तामसेन च भावेन, तत्क्षमस्व मम प्रभो ॥ ४ ॥
मन्त्रेणाक्षरहीनेन, पुष्पेण विफलेन च ।
पूजितोसि महादेव, तत्सर्वं क्षम्यतां मम ॥ ३ ॥
अज्ञानयोगादुपचारकर्म, यत्पूर्वरस्माभिरनुष्ठितं ते ।
तदेव सोद्वासनकं दयालो, पितेव पुत्रानतनो जुषस्व॥ ६ ॥

अयं दानकालस्त्वहं दानपात्रं भवानेव दाता त्वदन्यं न याचे ।
भवद्भक्तिमन्तःस्थिरां देहि मह्यं कृपाशील शम्भो कृतार्थोस्मि यस्मात् ॥७॥

ॐ नमोङ्काररूपाय नमोऽक्षरवपुर्धृते ।
नमो नादात्मने तुभ्यं नमो बिन्दुकलात्मने ॥ ८ ॥
अलिङ्गलिङ्गरूपाय रूपातीताय ते नमः ।
त्वं माता सर्वलोकानां त्वमेव जगतः पिता ॥ ९ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्वं भ्राता त्वं सुहृन्मित्रस्त्वं प्रियः प्रियरूपधृक् ।
त्वं गुरुस्त्वं गतिः साक्षात्त्वं पिता त्वं पितामहः ।।१०।।

नमस्ते भगवान्रुद्र भास्करामिततेजसे ।
नमो भवाय रुद्राय रसायाम्बुमयाय च ।।११।

शर्वाय क्षितिरूपाय सदासुरभिणे नमः ।
पशूनां पतये तुभ्यं पावकामिततेजसे ।।१२।।

भीमाय व्योमरूपाय शब्दमात्राय ते नमः ।
महादेवाय सोमाय अमृताय नमोऽस्तुते ।।१३।।

उग्राय यजमानाय नमस्ते कर्मयोगिने ।।
(पार्थिवस्य) नर्वदेश्वरस्य च लिंगस्य यन्मया पूजनं कृतम् ।
तेन मे भगवान्रुद्रो वांछितार्थं प्रयच्छतु ।।१४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीआद्यशंकराचार्य विरचितम्

शिव पञ्चाक्षर स्तोत्रम्

ॐ नागेन्द्र हाराय त्रिलोचनाय, भस्माङ्ग रागाय महेश्वराय ।
नित्याय शुद्धाय दिगम्बराय; तस्मै 'न' काराय नमः शिवाय ।।
मन्दाकिनी सलिल चन्दन चर्चिताय, नन्दीश्वर प्रमथनाथ महेश्वराय ।
मन्दारपुष्प बहुपुष्प सु पूजिताय, तस्मै 'म' काराय नमः शिवाय ।।
शिवाय गौरीबदनाब्ज - वृन्द, सूर्याय दक्षाध्वर नाशकाय ।
श्रीनीलकण्ठाय वृषध्वजाय, तस्मै 'शि' कराय नमः शिवाय ।।
वशिष्ठ कुम्भोद्भव गौतमाय, मुनीन्द्र देवार्चित शेखराय ।
चन्द्रार्क वैश्वानर लोचनाय, तस्मै 'व' काराय नमः शिवाय ।।
यक्षस्वरूपाय जटाधराय, पिनाक हस्ताय सनातनात ।
दिव्याय देवाय दिगम्बराय, तस्मै 'य' काराय नमः शिवाय ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri

पञ्चाक्षरमिदं प्रोक्तं, यः पठेत् शिवसन्निधौ ।
शिवलोकमवाप्नोति, शिवेन सह मोदते ।।इति।।

त्वमेव माता च पिता त्वमेव, त्वमेव बन्धु च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव, त्वमेव सर्वं मम देव देव ।। १ ।।

पापोऽहं पापकर्माहं पापात्मा पाप सम्भवः ।
त्राहि मां पुण्डरीकाक्ष सर्वपाप हरो हरिः ।। २ ।।

कृष्णाय वासुदेवाय देवकीनन्दनाय च ।
नन्दगोपकुमाराय गोविन्दाय नमो नमः ।। ३ ।।

कृष्णाय वासुदेवाय, हरये परमात्मने ।
प्रणतः क्लेशनाशाय, गोविन्दाय नमो नमः ।। ४ ।

एकोऽपि कृष्णस्य कृतः प्रणामः, दशास्वमेधावभृथेन तुल्यः ।
दशाश्वमेधी पुनरेति जन्म, कृष्णप्रणामी न पुनर्भवाय ।। ५ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वंशीविभूषितकरान्नवनीरदाभात्, पीताम्बरादरुणबिम्बफलाधरोष्ठात् ।
पूर्णेन्दुसुन्दरमुखादरविन्दनेत्रात्, कृष्णात् परं किमपि तत्वमहं न जाने ।।६।

निरावलम्बस्य मयावलम्बं, विपाटिताशेषविपत्कदम्बम् ।
मदीयपापाचल पातशंवं प्रवर्ततां पातु सदैव बम्बम् ।। ७ ।।

अर्पणमन्त्र

गुह्याति गुह्य गोप्तास्त्वं, गृहाणास्मत्कृतार्चनम् ।
सिद्धिर्भवतु मे देव, त्वत्प्रसादात् महेश्वरः ।।
।। ॐ हर हर हर महादेव ।।

पुस्तक प्राप्ति स्थान—
श्रीविशनचन्द्र सेठ
भूतपूर्व सदस्य लोकसभा
रमणरेती, वृन्दावन (मथुरा) उ० प्र०

ला० काशीनाथ सेठ
बैंकर्स एण्ड ज्वैलर्स
शाहजहाँपुर एवं बरेली (उ० प्र०)
मूल्य-सप्रेम शिवार्चन ● जनवरी १९७८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २०२३९४
बुलन्दशहर (उ०प्र०)

वेदाचार्य रामजी लाल पालीवाल सांगवेद विद्यालय
पुस्तकालय
ग्रंथ सं० .....
तिथि .....
४२, संगम विहार नजफगढ़, नई दिल्ली-४३

वेदाचार्य रामजी लाल पालीवाल साङ्गवेद
विद्यालय, नजफगढ़, नई दिल्ली-४३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति नैमित्तिक

श्री शिवार्चन पद्धतिः

समाप्ता

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २०२३९४
बुलन्दशहर (उ०प्र०)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection